An International Multidisciplinary Journal
अनन्यशास्त्रम्™
(A Unique Treatise of Knowledge)
ISSN:3049-3927 (Online)
Volume: 01 | Issue: 02 | August: 2025
Research Article

ANANYAŚĀSTRAM:
An International Multidisciplinary Journal
(A Unique Treatise of Knowledge)
Peer-Reviewed | Refereed | Open Access Journal
DOI: https://doi.org/10.64328/aimjv01i02019

# भारतीयकालगणनायां होराविज्ञानम्

**शिवमकुमारः जोषी***

**सारांशः**

विश्वस्मिन् अस्मदीया भारतीयकालगणना अतीव प्राचीना वैज्ञानिकी सूक्ष्मतमा वर्तते । भारतीयकालगणनैव सूर्यचन्द्रमसोर्गत्यनुसारं प्रचलति । तेन कारणेनास्माकं सर्वेप्युत्सवा नियतकाल एव आयान्ति । भारतीयकालपरिमाणस्य सूक्ष्मतमः कालः परमाणुर्वर्तते तथा बृहत्तमकालो ब्राह्मदिनं विद्यते । तत्र बहूनि परिमाणानि सन्ति, तानि यथा - परमाणु-अणु-पल-विपल-प्रतिपल-निमेष-क्षण-घटी-होरा-प्रहर-अहोरात्र-सप्ताह-पक्ष-मास-अयन-संवत्सर-ब्राह्मदिनादीनि । एषु परिमाणेष्वन्यतस्य होरापरिमाणस्य विज्ञानं प्रस्तूयते । होरा इति शब्दस्य कोर्थः ?, अस्मिन् शब्दे किं संपूर्णे लिङ्गम् ? का च व्युत्पत्तिः ? इति प्रश्नाः सहजतया जायन्ते । तर्हि अग्निपुराणे उक्तं यथा - **चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते । पश्चिमादर्द्धसत्रादि होराणां विद्यते क्रमः ।।** राश्यर्द्धभागो होरानाम्ना विज्ञायते । असौ शब्दः स्त्रीलिङ्गे वर्तते । **हृ - गतौ** धातोः **रन्** प्रत्यये कृते होराशब्दो निष्पद्यते । सामान्यतः प्रत्येकस्मिन् दिवसे चतुर्विंशतिहोराः भवन्ति । तत्र यस्य ग्रहस्य प्रथमा होरा भवति, तद्दिनमपि तद्ग्रहनाम्ना ज्ञायते । इत्थमस्माकं सूर्यादिवासराणां नामाभिधानं तथा क्रमनिर्धारणं जायते । तत्र होराणां विशिष्टः क्रमो वर्तते, सूर्यः शुक्रः बुधः चन्द्रः शनिः गुरुः मङ्गलः । अनेन क्रमेण सम्पूर्णस्य होराचक्रस्य निर्माणं भवति । यथा जैनधर्मे यात्रायाः प्राक् चोघडीयादर्शनं भवति तथैव मुहूर्ताभावे माङ्गलिककार्येषु, विद्यारम्भे, विवाहे, नूतनयन्त्रक्रयणे, भूमिक्रयणे इत्यादिषु विविधेषु कार्येषु होरायाः उपयोगिता वर्तते । अनेन प्रकारेण निश्चितग्रहस्य नियतहोरायां कार्यं क्रियते चेदवश्यं तत्तत्कार्येषु सिद्धिः प्राप्यते । एतादृग् विज्ञानमस्माकं भारतीयज्ञानपरम्परायां निहितं वर्तते ।

**संदर्भसूचिः** भारतीयकालगणना, परिमाणानि, ग्रहाः, होरा, विज्ञानम्, कार्यसिद्धिः ।

**Corresponding Author:* Shivamkumar Joshi, Ph.D. Research Scholar, Department of Sanskrit, Sardar Patel University, Vallabhvidyanagar, Gujarat, India., Email: Joshishivam762@gmail.com, ORCID: https://orcid.org/0009-0001-0249-9058
© 2025 Author(s). Published by Young India Publication, Gandhinagar, Gujarat, India

ANANYAŚĀSTRAM:
An International Multidisciplinary Journal
(A Unique Treatise of Knowledge)
ISSN : 3049-3927(Online)

## प्रस्तावना

भारतीयकालगणना इति विषयस्य श्रवणेनैव व्याप्तिन्यायेन वेदानामुपस्थितर्भवति । ऋग्यजुस्सामार्थवाश्चत्वारो वेदा इति सर्वैः सुविदितमेव । अमीषां चतुर्णां वेदानां ज्ञानाय तेषामङ्गानां ज्ञानमनिवार्यम् । तान्यङ्गानि यथा - शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम् । इमानि वेदपुरुषस्य निश्चिताङ्गानि । पाणिनीयशिक्षायामुक्तं यथा -

*छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।*
*ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।*
*शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं श्रुतम् ।*
*तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।*

(पा.शि. - ४१,४२)

तत्र ज्योतिषवेदाङ्गे विषयोऽयमन्तर्भवति । भारतीयकालगणना सूर्यचन्द्रमसोर्गत्यनुसारं चलति । अत एव ज्योतिषशास्त्रस्य महिमाविषये ज्योतिषवेदाङ्गप्रशस्तसूक्त्याम् उक्तं यथा-

*प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।*

ज्योतिषं वेदपुरुषस्य चक्षुषी स्तः । यथा मनुष्यः चक्षुषी चक्षुर्भ्यां विना द्रष्टुं न समर्थस्तथैव ज्योतिषशास्त्रस्य ज्ञानेन विना कर्म कर्तुं दुष्करमिति ।

*पुरुषसूक्ते सूर्योत्पतिर्विराट्पुरुषस्य नेत्रयोरभवदिति प्रोक्तम् ।*
*चक्षोः सूर्योऽअजायत ।* - पुरुषसूक्ते, शु.य. - ३१/१२

सूर्यो जगतोऽस्य नेत्रीभूत एव । अतो भानोर्यावत्यावश्यकता तावत्येव ज्योतिषशास्त्रस्याप्यावश्यकता ।

भारतीयकालगणना श्रेष्ठा सूक्ष्मतमा च वर्तते । इयं गणना ज्योतिषाधारिता वर्तते । एवञ्च ज्योतिषशास्त्रं सूर्यचन्द्रमसोर्गत्यनुसारं चलति । भारतीयकालगणनायां बहूनि परिमाणानि आसते । यथा - पलम्, विपलम्, प्रतिपलम्, निमेषः, क्षणम्, घटी, होरा, मुहूर्त्तम्, प्रहरः, अहोरात्रम्, सप्ताहः, पक्षः, मासः, अयनम्, संवत्सरम्, चतुर्युगम्, मन्वन्तरम्, कल्पः, ब्राह्मदिनम्, परार्द्धम् इत्यादीनि सन्ति ।

ज्योतिषशास्त्रे त्रयः सम्प्रदाया राजन्ते । १ होरा २ सिद्धान्तः ३ संहिता । अधुना मयेह भारतीयज्ञानपरम्परायां होराविज्ञानम् इति विषयमाधारीकृत्य प्रामाणिको यत्नः क्रियते ।

## विषय

आदौ तु मानसे बहवः प्रश्ना जायन्ते । होराशब्दस्य कोऽर्थः ? किं लिङ्गम् ? होराशब्दस्य का व्युत्पत्तिः ?

*चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते ।*

**ANANYAŚĀSTRAM:**
*An International Multidisciplinary Journal*
*(A Unique Treatise of Knowledge)*
ISSN : 3049-3927(Online)

*पश्चिमार्धसत्रादि होराणां विद्यते क्रमः ।।*

- अग्निपुराणे (उद्धृतम्, वाचस्पत्यम्)

*राश्यर्द्धभागो होरा स्यात्* । - वाचस्पत्यम्

द्विहोरात्मक एको राशिर्भवति, तस्यार्धोऽर्थात् षष्ठिनिमेषात्मिका होरा भवति । इत्थं होरा अर्थात् - 1 Hour. एकस्मिन् दिवसे चतुर्विंशतिहोरा भवन्ति । होराशब्दः स्त्रीलिङ्गे वर्तते ।

हुडृ - गतौ (भ्वादिगणीयः, वैयाकरणसिद्धान्तकौमुदीधातुक्रमाङ्कः - ३५२) इति धातोरुणादिः रन् प्रत्यये कृते होराशब्दो निष्पद्यते ।

ज्योतिषशास्त्रे कालगणनायाः बहूनि परिमाणानि सन्ति । तत्र बृहत्तमं परिमाणं ब्राह्मदिनं विद्यते । इदं होरापरिमाणम् अहोरात्रगणनायामुपयुक्तं भवति ।

होरागणनायाः प्राक् सूर्योदयस्य सूर्यास्तस्य च ज्ञानमतीवावश्यकम् । एवञ्च ऋतूणामनुसारं सूर्योदयसूर्यास्तसमये परिवर्तनमपि भवति तदपि ध्येयम् ।  कारणं द्वादशहोराः दिवसस्य द्वादशहोराः रात्रेश्च भवन्ति । सूर्योदयाद् दिनस्य होरागणनारम्भः, सूर्यास्तात् रात्रेर्होरागणनारम्भो भवति । होरागणना ग्रहाणां नामानुसारं भवति । तस्यां गणनायां होराणां विशिष्टः क्रमो वर्तते । तत्र सप्त होराः सन्ति । यथा -

१ सूर्यः २ शुक्रः ३ बुधः ४ चन्द्रः ५ शनिः ६ गुरुः ७ मङ्गलः

सप्ताहे वासराणां नामानि ग्रहाणां नाम्ना वर्तन्ते । यस्य ग्रहस्य आद्या होरा भवति, तन्नाम्ना तस्य वासरस्य नामकरणं भवति । यथा - यदि दिवसारम्भे प्रथमा होरा सूर्यस्य भवति तदा स सूर्यवासरः । दिनारम्भे प्रथमा होरा चन्द्रमसो भवति तदा स सोमवासरः । अनेन प्रकारेणास्माकं सप्ताहे रविः, सोमः, मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः इति वाराणां क्रमो वर्तते । अत्र कारणभूतं होराचक्रम् आस्ते ।
दिनस्योत्तमहोराः - सूर्यः, शुक्रः, बृहस्पतिः ।
रात्रेरुत्तमहोराः - चन्द्रः, भौमः, शनिः ।

## होराणाम् आवश्यकताः

विविधकार्याणां सिद्ध्यर्थं यथा मुहूर्तदर्शनं क्रियते, तद्वदेव होराया अपि दर्शनं क्रियते । इदं होरापरिमाणं मुहूर्तादपि लघुपरिमाणं वर्तते । कारणं एकस्मिन् मुहूर्ते षण्णवतिनिमेषा अन्तर्भवन्ति । होरायां षष्टिनिमेषा भवन्ति । अतः कदाचित् मुहूर्तं न लभ्यते, तदानीं होरादर्शनेनापि कार्यं साधयितुं शक्यते । विविधेषु कार्येषु

ANANYAŚĀSTRAM:
An International Multidisciplinary Journal
(A Unique Treatise of Knowledge)
ISSN : 3049-3927(Online)

मानवाः होरादर्शनं कुर्वते । यथा - माङ्गलिककार्यार्थम्, विद्यारम्भार्थम्, यात्रारम्भार्थम्, व्यवसायस्य प्रारम्भार्थम्, नूतनवस्तुक्रयणार्थम्, भूमिक्रयणार्थम्, इष्टकार्यसिद्ध्यर्थम् इत्यादिकार्यार्थं जना एतासां होराणां दर्शनं कुर्वन्ति ।

## होरानुसारं कर्तव्यकर्माणि

अधुना ग्रहानुसारं कर्तव्यकर्मणां विचारः स्पष्टीक्रियते । कस्य ग्रहस्य होरायां किं कर्म कर्तव्यम् ? इति जिज्ञासाशमनाय अधो विषयोऽयं लिख्यते ।

**सूर्यः** - सर्वकारनियुक्तेरावेदनम्, राजकीयकार्याणि

**चन्द्रः** - सर्वकर्माणि

**मङ्गलः** - ऋणसमाप्तिः, सेनासम्बन्धितकार्याणि, गृहक्रयणम्

**बुधः** - विद्यारम्भः, व्यवसायकर्माणि, धनालयकार्याणि

**गुरुः** - विवाहः, वस्त्रक्रयणम्, श्रेष्ठजनमेलनम्

**शुक्रः** - आभूषणक्रयणम्, स्वर्णरजतव्यवसायः, नूतनवस्त्रधारणम्, कलाकार्याणि

**शनिः** - गृहनिर्माणारम्भः, लोहसम्बन्धिकार्याणि, कृषिः, न्यायकार्याणि, तैलसम्बन्धितकार्याणि, यन्त्रक्रयणम्

अत्र ग्रहाणानुसारं तत्तद्धोरायां कर्तव्यकर्माणि सामान्येन प्रोक्तानि सन्ति, अन्यान्यपि कार्याणि वयं ग्रहाणां गुणस्वभावाधिपत्यादिकं दृष्ट्वा निश्चितुं शक्नुमः ।

## होराचक्रम्

अमुष्मिन् होराचक्रे सप्ताहस्य सम्पूर्णस्य दिनस्य होरा लिखिताः । आसां होराणां गणना सूर्योदयात् प्रारम्भनीया । इदमेव चक्रमविरतं चलति ।

| क्रमः | सूर्यवासरः | चन्द्रवासरः | भौमवासरः | बुधवासरः | गुरुवासरः | शुक्रवासरः | शनिवासरः |
|---|---|---|---|---|---|---|---|
| १ | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः |
| २ | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः |
| ३ | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः |
| ४ | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः |
| ५ | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः |
| ६ | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः |
| ७ | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः |
| ८ | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः |

ANANYAŚĀSTRAM:
An International Multidisciplinary Journal
(A Unique Treatise of Knowledge)
ISSN : 3049-3927(Online)

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ९ | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः |
| १० | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः |
| ११ | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः |
| १२ | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः |
| १३ | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः |
| १४ | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः |
| १५ | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः |
| १६ | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः |
| १७ | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः |
| १८ | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः |
| १९ | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः |
| २० | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः |
| २१ | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः |
| २२ | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः |
| २३ | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः |
| २४ | बुधः | गुरुः | शुक्रः | शनिः | सूर्यः | चन्द्रः | मङ्गलः |

## सन्दर्भग्रन्थसूचिः

१ अग्निपुराणम्, व्यासः, गीताप्रेसः गोरखपुरम्

२ पाणिनीयशिक्षा, शिवराजः आचार्यः कौण्डिन्न्यायनः, सम्पादकः - प्रमोदवर्धनः कौण्डिन्न्यायनः, चौखम्बा विद्याभवनम्, वाराणसी

३ बृहत्पाराशरहोराशास्त्रम्, (पराशरऋषिः), गणेशदत्तः पाठकः, सावित्रीठाकुरप्रकाशनम्, रथयात्रा, वाराणसी

४ वाचस्पत्यम्, तारानाथः भट्टाचार्यः

५ यजुर्वेदसंहिता, वेददर्शनाचार्यो महामण्डलेश्वरोऽनन्तविभूषितः स्वामिगङ्गेश्वरानन्द उदासीनः, योगेश्वरगुरुगङ्गेश्वरचैरिटेबलट्रस्ट, तुलसी निवास, डी रोड, चर्चगेट, बम्बई - २०

६ ashtadhyayi.com